


**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2015; 1(2): 176-178
www.allresearchjournal.com
Received: 11-11-2014
Accepted: 16-12-2014

**डॉ. सुवल चन्द्र साहु**
व्याकरणविभाग: सरकारीडिग्री संस्कृतमहाविद्यालय: वारिपदा, ओडिशा, भारत

**Correspondence**
**डॉ. सुवल चन्द्र साहु**
व्याकरणविभाग: सरकारीडिग्री संस्कृतमहाविद्यालय: वारिपदा, ओडिशा, भारत

# भारतीयसंस्कृतौ षोडशसंस्काराणां संप्रेक्षा

**डॉ. सुवल चन्द्र साहु**

**उपक्रम:**

समुपसर्गपूर्वकृधातौ: क्तिन् प्रत्यये संस्कृतिशब्दोऽयं सुनिष्पन्न:। मनुष्या: लौकिक–पारलौकिकक्षेमार्थं यादृशविचाराणामाश्रयं लभन्ते, तत्सर्वं संस्कृतिपर्याभुक्तं भवतीति । तादृशसंस्कृतौ कथं षोडशसंस्काराणां समन्वय: महर्षिभि: समभ्यस्त: तदेव अस्य निवन्धस्य आभिमुख्यम्, यत्तु मया प्रक्रमेण समुपस्थापित: ।

व्यक्तित्वस्य विकसनमेव संस्कृति: । संस्कृते: समारम्भो भारते प्रथमं संस्कारेभ्यो भवति । अतएव भारतीय संस्कृतौ संस्कारणामतीवमहत्वमस्ति । मानवकल्याणार्थं तज्जीवनविकासार्थ, भारतीय महर्षिभि: षोडशसंस्काराणां विस्मृतं सार्थकं सरहस्यं वर्णनं कृतम् । संस्कारेणेव शिशो: मानवताया: प्रथमो वोध: भवति । तेषां महतीमान्यता च सर्वत्र विद्यते यश्च गर्भाधानादारभ्य मृत्युपर्यन्तं स्वीक्रियते । तत्र मुख्य संस्कारा: यथा-

१. गर्भाधान संस्कार:
२. पुंसवन संस्कार:
३. सीमन्त्योन्नयन संस्कार:
४. जातकर्म संस्कर:
५. नामकरण संस्कार:
६. निष्क्रमण संस्कार:
७. अन्नप्राशन्न संस्कार:
८. चूडाकरण संस्कर;
९. कर्णवेध संस्कार:
१०. विद्यारम्भ संस्कार;
११. उपनयन संस्कार;
१२. वेदारम्भसंस्कार;
१३. केशान्त अथवा गोदान संस्कार:
१४. समावर्त्तन संस्कार:
१५. विवाहसंस्कार:
१६. अन्त्येष्टि संस्कार:

इमे संस्कारा: केवलं भारतवर्षे दृष्टिगोचरा: भवन्ति नान्तत्र। पुरा सश्रद्धं संस्काराणां पालनं भवति स्म। परन्तु कालक्रमात् संस्कारान् प्रतिद्विजातीनां श्रद्धान्युना जतायेन सम्प्रति प्रायश: संस्कारा: लुप्ता: जाता: तथापि यत्र तत्रैव संस्कारा; प्रचलिता: सन्ति ।इमे लौकिकपारलौकिक सुखानां साधनानि ।

**भारतीयसंस्कृतौ वर्णभेद:**

महर्षिमनु: वर्णयति –

एतद्धेश प्रसूतस्य सकाशदग्र जन्मन:
स्वं स्वं चरत्रिं शिक्षेरन् पृथिव्यां सर्वेमानवा: ।।

भारतवर्षे जायमाना: ब्रह्मर्षि-महर्षि -मनिषी- गणा: यादृशं शिक्षानुशासनम् दास्यन्ति इति । तद्रीत्या पृथिव्यां सर्वे जना: स्वचरित्रं शिक्षिष्यन्ते इति । तत्र वर्णश्रमधर्म: भारतीयसंस्कृतौ महत्वपूर्णं स्थानं अधिकरोति । मानव-कल्याण-निमित्तं वर्णव्यवस्थ्या अपरिहार्या । वर्णशव्दस्य अर्थ अस्मिन् संदर्भे गीतायामुक्तम्

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागश: ।
तस्य कत्तारमपि मां विद्ध्यकर्त्तारमव्ययम् ।।

शङ्कराचार्य: अत्र वर्णयति यथा- चातु: वण्यं चत्वार एव वर्णा: चातुवर्ण्य मया ईश्वरेण स्पृष्टमुत्पादितं – ब्राह्मणेऽभ्य मुखमासीत् इत्यादिश्रुते: गुणकर्म ।
आसनन्ततात् श्रयते इति आश्रम: यद्यपि चतु: आश्रम- व्यवस्ता वैदिक युगे परिलक्ष्यते, परन्तु इदानीं गृहस्था स्तथा सन्यास इति आश्रम द्वयस्य व्यवस्था उपलभ्यते । महानिर्वाण तत्रे यथापर्यालोचितम् –

ग्रार्हस्थ्यो: र्भोक्षुकश्चैव आश्रमौ द्वोकलौ युगे ।
चातुवर्णं सम्बन्धे शास्त्रेषु प्रदत्तं लक्षणं वक्षमाणरीत्या प्रदर्श्यते ।।

**१. ब्राह्मण:**
वर्णव्यवस्थायां व्राह्मण: सर्वश्रेष्ठोऽस्ति । स: पृथिव्यां देवता इति । ब्राह्मण कर्म विषये भगवता कृष्णेन कथ्यते ।

**गीतायामुक्तम्**

शमो दमस्तप: शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं व्रह्मकर्म स्वभावजम् ।।

**मनुना कथितम्**

अध्यापनमध्ययनं यजनं याजनं तथा
दानं प्रतिग्रहं चैव व्राह्मणानामकल्पयम् ।।

**२. क्षत्रिय:**
क्षत्रियकर्मविषये भगवताकृष्णेन गीतायामुक्तम् –

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चापं पलायनम्
धनमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ।।
प्रजानां रक्षणं दानमिज्याध्ययनमेव च ।
विषयेष्व प्रसक्तिश्च क्षत्रियस्य समासत: ।।

**षोडशसंस्काराणां वर्णनम्**

**१. गर्भाधान संस्कार:**
शिशो: मातृगर्भे वीजरूपेण प्रतिष्ठापनं हि गर्भाधानम् । वैदिककालेऽस्मिन्नवसरे विष्णु –प्रजापति सरस्वतीनां भावनं कृतम् । परवर्ति युगे गर्भधानाय तीर्थानां नक्षत्राणां च शुभाशुभत्वं पर्यालोचितम् ।
पत्या ऋतुस्नाताया: कामिन्या सहवासेन योग्यसन्तान प्राप्यर्थं शुभमुहूर्तै: गर्भाधान संस्कारस्य आवश्यकता भवति । अत्र पति: परमेश्वरं प्रार्थयति यत् – धाता गर्भं दधातु ते ।

**२.पुंसवन संस्कार:**
गर्भाधाने सन्तान रक्षाणार्थं पुंसवन संस्कार: क्रियते । संस्कारोऽयं गर्भाधानात् तृतीये चतुर्थे मासे शुभे मुहूर्त्ते सम्पन्नो भवति । अत्र दम्पती अग्नि परिक्रमां कुरुत: प्रतिज्ञां कुरूत श्च, आवामेतादृशं कर्यं न करिष्याव: येन गर्भपात: स्यात् । पत्न्या: ध्यानं पुरुषो सन्तानोपरि भवति, एतस्मात् संस्कारोऽयं पुंसवनसंस्कार उच्यते ।

**३.सीमान्तोन्नयन संस्कार:**
सीमान्तोन्नयनस्य आशय: केशानां प्रसाधनम् । अस्मिन् संस्कारे पति: पत्न्या: केशानां संस्कारं करोति । अयं प्रथम गर्भधारणात् पञ्चमे मासे शुभमूहूर्त्ते क्रियते । अत्र स्त्रिय:हदस्य पूत्ति: क्रियते । वैदिक युगे सीमन्तोन्नयनावसरे वीणावाद्यपूर्वकं सोमराजस्य स्तुतिं कुर्वान्ति ।

**४.जातकर्म संस्कार:**
**संस्कारोऽयं शिशौ जाते शुभे मुहूर्त्ते उत्रक्षणार्थं** क्रियते ।प्रथमं तावत् वैश्वानरस्य परितुष्टि: सम्पाद्यते । वैश्वानरस्य परितोषेण जातस्यशिशो: कालान्तरे तेजस्वितया: समृद्धे: शक्तेश्च सम्भावना अभिमता । स घृतं मधु शिशवे ददाति। पिता तदायुष्यकामार्थमीश्वरं स्तौति । अग्निरायुष्यं स वनस्पतिरायुष्यष्यमित्यादि आश्वालायनानुसारं दधि मधु घृतं प्राशयन् पिता शिशवे शतवर्षाणां पूर्णायुर्कामयते। तत: शिशो: मेधांजनयितुं तस्य निकटे गायति-

मेधां त्वे देहि सविता मेधां देवी सरस्वती ।
मेधां त्वे अश्विनि देवआधत्तां पुष्करस्त्रर्जे ।।

**५. नामकरण: संस्कार:**
संस्कारोऽयं शिशुजन्मत: द्वादशोदिने क्रियते, नाम्न: अस्ति महत्वमिति विहितं सर्वेषाम् । नाम्नो मदुरध्वनि: स्पृहणीया एव । वौधायनानुसारं पुरुषाणां नामानि ऋषिदेवपर्वतानां नामान्याश्रित्य भवेयु: । साक्षादेव देवानां नामानि न ग्रहीतव्यानि इति । स्त्रीणां नामान्यकृत्य मनुना निर्द्धिष्टम् –

स्त्रीणां सुखोद्यमक्रुरंविस्पष्टार्थं मनोरमम् ।
माङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ।।

विष्णुपुराणानुसारं तु –

गुप्तदासात्मकं नाम प्रशस्तं वैश्यशुद्रयो: ।
नार्थहीनं न चाशास्तं नापशब्दयुतं तथा ।।
नामङ्गल्यं जुगुप्स्यं वा नाम कुर्यात् समाक्षरम् ।
नीति दीर्घं नाति ह्रस्वं नाति गुर्वक्षरान्वितम् ।
सुखोच्यार्यं तुतन्नम कुर्यादयत् प्रवणाक्षरम् ।।

**६. निष्क्रमण संस्कार:**
संस्कारोऽयं शिशु जन्मत: तृतीये चतुर्थे मासे वा शुभ मुहुर्त्ते भवति । संस्कारेऽस्मिन् बालक: प्राकृतिकदृश्यं सूर्यं चन्दयो: प्रकाशश्च प्रशयति, येन शिशो: दृष्टिजाति: सम्वर्द्धते । निष्क्रमणादिवसे तत्र सुर्यस्य दर्शनं प्रथमं समासादितम् । रात्रो निष्क्रमणविधै चन्द्रदर्शनं कारितम् ।

**७. अन्नप्राशन्न संस्कार:**
संस्कारोऽयं शिशो: जन्मत: षष्टेऽष्टमे वा मासे शुभे मुहूर्त्ते क्रियते । अस्मिन्

अवसरे अन्नप्राशन्नं भवति, अस्य संस्कारस्य उद्देश्यं वालकस्य शरीरस्य पोषणमस्ति। अन्नप्राशन्नानन्तरं शिशवे स्वल्पहार: प्रदीयते । येन वालकस्य पाचन क्रियाया: पुष्टि भवति यथा-

आहारशुद्धो सत्वशुद्धि:, सत्वशुद्धौ ध्रुवास्मृति: ।
श्मृतिलाभे सर्वग्रन्थीनां विप्रमोक्ष: ।।

भोजनं ग्रासं दत्वा पिता भूर्भुव: स्व: इत्युच्चारणं करोति । भारतीय धारणानुसारमनं देवतारुपं वर्त्तते । अस्मिन् संस्कारे देवस्य स्तुतिविहिता ।

**८. चूडाकरणसंस्कार:**

संस्कारेऽस्मिन् मुण्डनसंस्कारं भवति । केशकर्तनस्य आयुर्वेदानुसारं सन्ति यथा- पपोपरामनं केशनश्वरो..............सं प्रसाधनम् ।
मुण्डितकेशा; पिष्टपिण्डेन पिधाय नद्यां सरोवरे वाक्षिप्यन्ते तथा वालकस्य मुण्डिते शिरसि सुगन्धिततैलं संलप्य शुद्धजलेन तं वालकमाभि शेचयन्ति ।

**९. कर्णवेध संस्कार:**

संस्कारेऽयं शिशुजन्मत: तृतीये पञ्चमे वा वर्षे शुभमुहूर्त्ते क्रियते । अस्मिन् अवसरे स्वर्णकार: श्रेष्ठपुरुषो वा तप्त शालाकाया कर्णयोच्छेदनं करोति । तथैवतादृशमौषधं लेपयति, तेन तत्र व्रणभयं न जायते ।

**१०. विद्यारम्भ संस्कार:**

सांस्कृतिक संस्कारोऽयं न च प्राकृत संस्कार: । यदा वालकस्य शिक्षा ग्रहणे योग्यता आगच्छति तदा शिक्षाया: आरम्भ अर्थात् विद्यारम्भ संस्कार: भवति । यद्यपि क्रमानुसारं संस्कारोऽयं उपनयन संस्कारात् प्रागेव आगच्छति, किन्तु उद्भव दृष्ट्या अर्वाचीन संस्कारोऽयम् । विभिन्नेषु धर्मशास्त्रेग्रन्थेषु विद्यारम्भ: अक्षराम्भ: अक्षरस्वीकरणम् अक्षरलेखनमिति नामान्तरं दृश्यते ।

**११.उपनयनसंस्कार:**

उपनयन शब्द: उपसर्गपूर्वकात् निधातो ल्युट् प्रत्यये कृते सति निष्पदयते । संस्कारोऽयं वालक: गुरोराचार्यस्य समीपे नीयते । संस्कारोऽयं शिशु जन्मत: ब्राह्मण-क्षत्रीय-वैश्य-वालकानां क्रमशोऽष्टमे एकादशो द्वादश च बर्षे सम्पाद्यते,संस्कारेऽस्मिन् गुरुचार्ये वा गणेशादि देवानां पूजनानन्तरं वालकं यज्ञोपवीतं परिधायति तत्र मन्त्र:-

ज्ञायेपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्ताद् ।
आयुष्यमग्रयम् प्रतिमुञ्च शुभ्रं यज्ञोपवीतं वलमस्तु तेज: ।।

तदन्तरं गायत्रीमन्त्रमुपदिश्रति- ॐ भूर्भूव: एतस्मादनन्तरमेव वालक: द्विजो भवति । वालक: व्रह्मचर्यव्रतं शुश्रूषां च पालयन् गुरु कुर्वन् गायत्री मन्त्रं जपति, शास्त्रऽध्ययनं च करोति । स्वजीविकार्थं भिक्षाटनमपि विद्यत्ते ।

**१२. वेदारम्भ संस्कार:**

उपनयनानन्तरं संस्कारोऽयं जायते । गुरोराचार्यस्य वा सन्निधौ निवसन्, स्वसंप्रदायानुसारं ऋग्यजु: समार्थवसु वेदेष्वन्यतमस्याध्यनं करोति ।

**१३.केशान्त अथवा गोदान संस्कार:**

वैदिक व्रतुषुक्षौरकर्म प्रधानकर्म आसित् । विद्यारम्भ: संस्कारापेक्षया केशान्त संस्कार: प्रचीनतम: । संस्कारेऽस्मिन् प्रथमत: स्मश्रु क्षरं भवति, गोदान संस्कार: इति कतयन्ति । यत: संस्कारकाले गोदानं समर्पणं भवति गुरुवर्याणां कृते । षोडशवर्षानन्तरं संस्काराध्यम् नुष्टीयते ।

**१४. समावर्त्तनसंस्कार:**

वेदशिक्षाया: समाप्त्यनन्तरमयं संस्कारो भवति । गृहगमनात् पूर्वमाचार्ये: सत्यंवद धर्मंचर- मातृदेवो भव । अतिथिदेवो भव । यान्यस्माकं सुचरितानित्वयोपास्थानि, नो इतराणि........श्रद्धया देयम्, अशद्धयादेयम् । श्रियादेयम् । एष आदेश एष उपदेश: एषा देवोपनिषदत् एतदनुशासनम् । समावर्त्तनमनुस्नातकस्य गृहस्थाश्रमपरिपालनाय तु विवाह संस्कारेण स योग्य: ।

**१५. विवाह संस्कार;**

समावर्त्तनान्तरं यदा वटु: गुरोराचार्यस्यवाऽऽस्रमात् गृहमागच्छति तदा गृहस्थाश्रमे प्रविशति । तत्रविवाहस्यावश्यकता भवति । स: कुलानुरुपां गुणवतीं सुशीलां कन्या-मुद्धाहयति । संस्कारोऽयं पाणिग्रहणं संस्कारोमुच्यते । हिन्दुधर्मेविवाह संस्कारस्य अतीव महत्वपूर्णस्थानमस्ति । पत्नी अर्द्धाङ्गिनी उच्यते, एनां विना किमपि धर्मिकमनुष्ठानं सफलं न भवति । नगृहं गृहमित्याहु र्गृहिणी गृहमुच्यते पत्नीभूत्वा सा यज्ञकर्माणि सहायाभूत्। पुत्रलाभेन पितृणामृणाद् मुक्ति: सम्भविता । आत्मा वैजायते पुत्र: इत्यात्म जातायापि विवाहस्य आवश्यकता अस्ति । मनुनामनुस्मृतो अष्टविधा: विवाहा: वर्णिता ।

**१६.अन्तोष्टिक्रिया संस्कार:**

मरणानन्तमयं संस्कारो भवति । शास्त्रानुसारं मृतकशरीरं श्मशाने प्रज्वाल्यते अथवा कस्याश्चित् नद्यां प्रवाह्यते । इमं संस्कारं सम्पादयितु पुत्र एवाधिकृत: स: पितु: दैहिक क्रियां श्रद्धयासम्पादयन्ति।

**उपसंहार:**

संस्कार: हि वर्णाश्रमधर्मस्य दिव्यभूषणस्वरुपं प्रतीयते । श्रुतिस्मृतिसंवलितसदाचार: परिष्करणं, परिमार्जनं संशोधनं संस्कारस्य आधारभूता: भवन्ति । चरकसंहिता कथयति – संस्कारो हि गुणान्तराधानमुच्यते । अर्थात् दुर्गुणस्य परिहारपूर्वकं सद्गुणस्य समाश्रयणमेव संस्कार: । मानवचरित्रनिर्माणक्षेत्रे संस्कारस्य भूमिका महत्त्वपूर्णा । संस्कारस्य प्रतिष्टा न केवलं प्रवचने अपि तु वाह्याभ्यन्तराचरणे, न हि संकल्पे, अपि तु साधनायां, न वा धर्माचक्षुग्राह्यचित्रपट्ट, अपि तु चरित्रे एव संम्भवति । धर्मार्थकाममोक्षरुपपुरुषार्थस्य भित्तिप्रस्तर एव संस्कार: । शास्त्रेषु संस्कारस्य वर्णनं वहुधा दरीदृश्यते, यथा- आश्वलायनगृह्यसूत्रे एकादशविधसंस्कारा:, पारस्करस्तथावौधायनगृह्यसूत्रे त्रयोदशविधसंस्कारा:, वैखानसगृह्यसूत्रे अष्टादशविधसंस्कारा:, याज्ञवल्क्यस्मृतौ षोडशविधसंस्कारा:, अचार्यनिम्बार्कमते पञ्चविधसंस्कारा: मनुस्मृतौ षोडशविधसंस्काराणां वर्णनं विद्यते । मया तु मनुस्मृतौ महर्षिमनुवर्णितानां षोडशसंस्कारानां विषया: यथामति वर्णिता: सन्ति । संस्काराणामाधारेण एव जीवनं शुद्धं, दिव्यं, पवित्रं, सार्थकं च प्रतिभाति ।

**सहायकग्रन्थसूची**


१. मनुस्मृति:, चौख्म्वाविद्याभवन, वारणासी-२०१०ऽ
२. गीता, गोविन्दभवन कार्यालय,१५१, महात्मागान्धी रोड, कलिकता।
३. संस्कार प्रकाशक, गीताप्रेस, गोरखपुर।
४. चरकसंहिता, चौखम्बा कृष्णदास एकादमी, वारणासी।